**झारखण्ड शैक्षिक अनुसन्धान एवं प्रशिक्षण परिषद्, राँची**

**कक्षा- एकादशी　　वार्षिकी परीक्षा 2024-25　　विषयः- संस्कृतम्**

**समयः- 1 घंटा　　आदर्शप्रश्नपत्रम्　　पूर्णांकाः- 40**

**(बहुविकल्पीयाः प्रश्नाः)**

सामान्यनिर्देशाः-

- अस्मिन् प्रश्नपत्रे चत्वारिंशत् (40) प्रश्नाः। (इस प्रश्न-पत्र में 40 प्रश्न हैं।)
- सर्वे प्रश्नाः अनिवार्याः। (सभी प्रश्न अनिवार्य हैं।)
- प्रत्येक-प्रश्नार्थं एकोऽङ्को निर्धारितः। (प्रत्येक प्रश्न के लिए एक अंक निर्धारित है।)
- प्रत्येक-प्रश्नस्य चत्वारो विकल्पाः। उचितविकल्पं चिनुत। (प्रत्येक प्रश्न के चार विकल्प दिए गए हैं। उचित विकल्प का चयन करें।)
- अनुचितोत्तरार्थं कोऽपि नकारात्मकाङ्को नास्ति। (गलत उत्तर के लिए कोई नकारात्मक अंक नहीं है।)

**(खण्ड क)**

**अपठित-अवबोधनम्**

**निर्देशः-अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि विकल्पेभ्यः चित्वा लिखत-**

श्रीहर्षस्य नैषधीयचरितं नितान्तप्रसिद्धं विशालकायं महाकाव्यम् अस्ति। श्रीहर्षस्य पिता श्रीहीरस्तथा माता च मामल्लदेवी आस्ताम्। श्रीहीरः काशीवासिनो गढवाल-वंशोद्भवस्य विजयचन्द्रस्य सभापण्डित आसीत्। शास्त्रार्थे केनापि विदुषा जितः श्रीहीरो मरणसमये स्वजेतारं पण्डितं पराजेतुं स्वसुतं श्रीहर्षं कथितवान्। तदाज्ञावशवर्ती श्रीहर्षो गङ्गातीरे चिन्तामणिमन्त्रजपं कृत्वा विशिष्टां प्रतिभां प्राप।

1.'नैषधीयचरितम्' इति महाकाव्यस्य रचयिता कः?

क. श्रीकृष्णः　ख. कालिदासः　ग. भासः　घ. श्रीहर्षः

2.श्रीहर्षस्य पितुः नाम किम्?

क.श्रीहीरः　ख.श्रीमानः　ग.श्रीमाधवः　घ.श्रीमोहनः

3. श्रीहर्षस्य मातुः नाम किम्?

क.गङ्गादेवी　ख.मामल्लदेवी　ग.वसन्तदेवी　घ.मालतीदेवी

4.'आसीत्' इति क्रियायाः अत्र कर्तृपदं किम्?

क.श्रीहीरः　ख. श्रीहर्षः　ग.मामल्लदेवी　घ.विजयचन्द्रः

5. 'विशालकायं महाकाव्यम्' अनयोः पदयोः विशेष्यपदं किम्?

क.विशालकायं　ख.विशालः　ग.महाकाव्यम्　घ.महाकाव्यः

**(खण्ड ख)**

**(रचनात्मकं कार्यम्)**

**निर्देशः-अमितः दिल्लीनगरे वसति। तस्य मित्रम् आशीषः जमशेदपुरनगरे वसति। अमितेन गणतंत्रदिवसस्य शोभायात्रायां भागः गृहीतः। सः स्वानुभवान् स्वमित्रम् आशीषं प्रति पत्रं लिखति। विकल्पेभ्यः पदानि विचित्य पत्रं लिखत-**

प्रियमित्र आशीष !,

(6)-------

अत्र कुशलं तत्रास्तु। अहं गणतन्त्र-दिवस-समारोहस्य सज्जायां व्यस्तः आसम्। अतः विलम्बेन तव पत्रस्य उत्तरं ददामि। अस्मिन् वर्षे मयापि गणतन्त्रदिवसस्य शोभायात्रायां भागः(7)-------।अस्माकं विद्यालयस्य राजपथे वाद्यवृन्दं स्वकलायाः प्रदर्शनम् अकरोत्। अहं गरवानृत्यस्य (8)-------------आसम् । छात्राणां राष्ट्रगानस्य ओजस्वो ध्वनिः राजपथं गुञ्जितम् अकरोत्। स्वराष्ट्रस्य सैन्यबलानां पराक्रमप्रदर्शनानि, विचित्रवर्णानि परिदृशानि (9)-------- च दृष्ट्वा अहं गौरवान्वितः अस्मि।(10)--------बाल्यावस्थायाः स्वप्नः तत्र पूर्णः जातः। पितरौ वन्दनीयौ।

भवतः मित्रम्

अमितः

6.क.नमस्ते ख.आदर्शः ग.विषये घ.कक्षा

7.क.गृहीतः ख.पठितः ग.चलितः घ.धावितः

8.क.प्रमुखसञ्चालकः ख.देवः ग.बालकः घ.अनुजः

9.क.लोकनृत्यानि ख.गृहाणि ग.फलानि घ.पुष्पाणि

10.क.मम ख.तव ग.अस्माकं घ.मह्यं

नवोन्मेष शोध नेतृत्व JCERT

**(खण्ड ग)**

**(अनुप्रयुक्तव्याकरणम्)**

**निर्देशः- प्रदत्तविकल्पेभ्यः समुचितम् उत्तरं चित्वा लिखत-**

11.'इ' वर्णस्य उच्चारणस्थानं किम्?

क.दन्तः ख.दन्तोष्ठः ग.तालुः घ.कण्ठोष्ठः

12. वर्णान् संयोज्य लिखत- 'उ+ष्+ण्+अ+म्'-

क.उषणम ख.उष्णम् ग.उष्नम घ.ऊष्णम्

13. 'फलेन' पदे का विभक्तिः प्रयुक्ता?

क.सप्तमी ख.षष्ठी ग.तृतीया घ.चतुर्थी

14.'पठ्' धातोः लोट्लकारे मध्यमपुरुषे एकवचने रूपं चिनुत-

क. पठ ख.अपठत् ग.पठति घ.पठताम्

15. 'सेवते' पदे कः लकारः?

क.लट्　　　ख.लृट्　　　ग.लोट्　　　घ.लङ्

16. मया ------- गम्यते।रिक्तस्थानाय उचितं विकल्पं चिनुत-

क.गृहं　　　ख.फलं　　　ग.पुस्तकं　　　घ.पुष्पं

17. सः प्रतिदिनं पुस्तकं-------।रिक्तस्थानाय उचितं विकल्पं चिनुत-

क.खादति　　　ख.क्रीडति　　　ग.पठति　　　घ.गच्छति

18.'मनोहरः' इति पदे कः सन्धिः अस्ति?

क.स्वरसन्धिः　　　ख.व्यञ्जनसन्धिः　　　ग.विसर्गसन्धिः　　　घ.दीर्घसन्धिः

19. नगरम् उभयतः नदी वहति।'उभयतः' योगे का विभक्तिः प्रयुक्ता?

क.प्रथमा　　　ख.द्वितीया　　　ग.तृतीया　　　घ.चतुर्थी

20. अलम् ---------।रिक्तस्थानाय उचितं विकल्पं चिनुत-

क.विवादाय　　　ख.विवादेन　　　ग.विवादात्　　　घ.विवादस्य

**(खण्ड घ)**

**(पठित अवबोधनम्)**

**निर्देशः-अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि विकल्पेभ्यः चित्वा लिखत-**

बोधिसत्त्वः किल कस्मिंश्चित् नातिमहति कमलकुवलयादि- विभूषितसलिले हंसचक्रवाकादिशोभिते तीरान्ततरुकुसुमावकीर्णे सरसि मत्स्याधिपतिः बभूव। बहुषु जन्मान्तरेषु परोपकाराभ्यासवशात् तत्रस्थः अपि परहितसुखसाधने व्यापृतः अभवत्। इष्टानामिव च स्वेषाम् अपत्यानाम् उपरि सौहार्दत्वाद् महासत्त्वः तेषां मीनानां दानप्रिय- वचनादिक्रमैः परमनुग्रहं चकार।

21.कः मत्स्याधिपतिः बभूव?

क.बोधिसत्त्वः　　　ख.पुत्रः　　　ग.दारकः　　　घ.जनकः

22.महासत्त्वः केषां दानप्रिय-वचनादिक्रमैः परमनुग्रहं चकार?

क.लतानाम्　　　ख.मीनानाम्　　　ग.ज्वालानाम्　　　घ.अम्बानाम्

23.बहुषु केषु परोपकाराभ्यासवशात् तत्रस्थः अपि परहितसुखसाधने व्यापृतः अभवत्?

क.मारुतेषु　　　ख.चन्दनेषु　　　ग.जन्मान्तरेषु　　　घ.दिवसेषु

24.'पक्षी' इत्यस्य पदस्य पर्यायवाचकपदं लिखत-

क.मीनः　　　ख.मेघः　　　ग.खगः　　　घ.झषः

25.'सरसि' इति पदे का विभक्तिः?

क. द्वितीया　　　ख.तृतीया　　　ग.षष्ठी　　　घ.सप्तमी

**निर्देशः अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि विकल्पेभ्यः चित्वा लिखत-**

**क्षात्रधर्मरता धन्या विदुरा दीर्घदर्शिनी।**

**विश्रुता राजसंसत्सु श्रुतवाक्या बहुश्रुता ॥**

**विदुरा नाम वै सत्या जगर्हे पुत्रमौरसम्।**

**निर्जितं सिन्धुराजेन शयानं दीनचेतसम्।**

**अनन्दनमधर्मज्ञं द्विषतां हर्षवर्धनम्॥**

26.विदुरा कुत्र विश्रुता आसीत्?

क.राजसंसत्सु ख.देवसंसत्सु ग.बालसंसत्सु घ.छात्रसंसत्सु

27.विदुरायाः पुत्रः केन पराजितः अभवत्?

क.सिन्धुराजेन ख.बिन्दुराजेन ग. मित्रराजेन घ. देवराजेन

28.विदुरा कं जगर्हे?

क.राजपुत्रम् ख.औरसपुत्रम् ग.पुत्रम् घ.परपुत्रम्

29.क्षात्रधर्मरता का आसीत्?

क.मीरा ख.विदुरा ग.अहिल्या घ.द्रौपदी

30. 'धन्या विदुरा' अनयोः पदयोः विशेषणपदं किम्?

क. धन्या ख.विदुरा ग.धन्यः घ.विदुरः

**निर्देशः- अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि विकल्पेभ्यः चित्वा लिखत-**

(ततः प्रविशति दारकं गृहीत्वा रदनिका)

**रदनिका**- एहि वत्स ! शकटिकया क्रीडावः।

**दारकः** -(सकरुणम्)

रदनिके ! किम्मम एतया मृत्तिकाशकटिकया? तामेव सौवर्णशकटिकां देहि।

**रदनिका**- (सनिर्वेदं निःश्वस्य)

जात ! कुतोऽस्माकं सुवर्णव्यवहारः ? तातस्य पुनरपि ऋद्ध्या सुवर्णशकटिकया क्रीडिष्यसि। (स्वगतम्) तद्यावद् विनोदयाम्येनम्। आर्याया वसन्तसेनायाः समीपमुपसर्पिष्यामि। (उपसृत्य) आर्ये! प्रणमामि ।

**वसन्तसेना**- रदनिके ! स्वागतं ते। कस्य पुनरयं दारकः? अनलङ्कृत- शरीरोऽपि चन्द्रमुख आनन्दयति मम हृदयम्।

**रदनिका**- एष खलु आर्यचारुदत्तस्य पुत्रो रोहसेनो नाम।

31.रोहसेन: कस्य पुत्र: आसीत्?

क.चारुदत्तस्य     ख.मोहनस्य     ग.रामस्य     घ.कृष्णस्य

32.दारक: कया क्रीडति?

क.शकटिकया     ख.लतया     ग.मालया     घ.चिन्तया

33.दारक: किम् इच्छति?

क.मृत्तिकाशकटिकाम्     ख.काष्ठकटिकम्     ग.मृच्छकटिकम्     घ.सौवर्णशकटिकाम्

34.'गृहीत्वा' इति पदे क: प्रत्यय:?

क. तव्यत्     ख.ल्यप्     ग.क्त्वा     घ. शानच्

35. 'अलीकम्' इत्यस्य पदस्य विलोमपदं लिखत-

क.असत्यम्     ख.सत्यम्     ग.उपेहि     घ.आदाय

**निर्देश:-अधोलिखित-श्लोकस्य अन्वय: विकल्पेभ्य: चित्वा लिखत-**

**सङ्गच्छध्वं सं वंदध्वं सं वो मनांसि जानताम्।**

**देवा भागं यथा पूर्वे सञ्जानाना उपासते॥**

**अन्वय:-** यथा पूर्वे सञ्जानाना: देवा भागं उपासते (तथा यूयम्) (36)-----------,संवदध्वं व:

मनांसि सञ्जानताम् ।

36. क.सङ्गच्छध्वं     ख.मीनानाम्     ग.प्रत्यहम्     घ.विमृशन्

**निर्देश:- प्रदत्तविकल्पेभ्य: समुचितम् उत्तरं चित्वा लिखत-**

**37. 'तदेव गगनं सैव धरा'** कवितासंग्रह: कस्य रचना?

क. श्रीनिवासरथस्य     ख.कालिदासस्य     ग.माघस्य     घ.श्रीहर्षस्य

**38.** चरकसंहिताया: रचयिता क:?

क.विष्णुशर्मा     ख. वेदव्यास:     ग.वाल्मीकि:     घ.महर्षि:चरक:

39. 'भवानी भारती' खण्डकाव्यस्य रचयिता क:?

क. कालिदास:     ख.व्यास:     ग.श्रीहर्ष:     घ.महर्षि:अरविन्द:

40.रवीन्द्रनाथटैगोरस्य विश्वविख्याता कृति: का ?

क. भवानी भारती     ख.गीताञ्जलि:     ग.आनन्दमठ:     घ.मृच्छकटिकम्

**झारखण्ड शैक्षिक अनुसन्धान एवं प्रशिक्षण परिषद्, राँची**

**कक्षा- एकादशी    वार्षिकी परीक्षा 2024-25    विषयः- संस्कृतम्**

**आदर्श (MODEL) उत्तराणि**

| | | | |
|---|---|---|---|
| **1.** घ. श्रीहर्ष: | **11.** ग.तालुः | **21.** क.बोधिसत्त्व: | **31.** क.चारुदत्तस्य |
| **2.** क.श्रीहीर: | **12.** ख.उष्णम् | **22.** ख.मीनानाम् | **32.** क.शकटिकया |
| **3.** ख.मामल्लदेवी | **13.** ग.तृतीया | **23.** ग.जन्मान्तरेषु | **33.** घ.सौवर्णशकटिकाम् |
| **4.** क.श्रीहीर: | **14.** क. पठ | **24.** ग.खग: | **34.** ग.क्त्वा |
| **5.** ग.महाकाव्यम् | **15.** क.लट् | **25.** घ. सप्तमी | **35.** ख.सत्यम् |
| **6.** क.नमस्ते | **16.** क.गृहं | **26.** क.राजसंसत्सु | **36.** क.सङ्गच्छध्वं |
| **7.** क.गृहीत: | **17.** ग.पठति | **27.** क.सिन्धुराजेन | **37.** क. श्रीनिवासरथस्य |
| **8.** क.प्रमुखसञ्चालक: | **18.** ग.विसर्ग सन्धि: | **28.** ख.औरसपुत्रम् | **38.** घ.महर्षि:चरक: |
| **9.** क.लोकनृत्यानि | **19.** ख.द्वितीया | **29.** ख.विदुरा | **39.** घ.महर्षिःअरविन्दः |
| **10.** क.मम | **20.** ख.विवादेन | **30.** क. धन्या | **40.** ख.गीताञ्जलि: |